# શિવષડાક્ષર સ્તોત્રમ

ૐકારં બિંદુસંયુક્તં નિત્યં ધ્યાયંતિ યોગિનઃ ।
કામદં મોક્ષદં ચૈવ ૐકારાય નમો નમઃ ।। ૧।।
નમંતિ ઋષયો દેવા નમન્ત્યપ્સરસાં ગણાઃ ।
નરા નમંતિ દેવેશં નકારાય નમો નમઃ ।। ૨।।
મહાદેવં મહાત્માનં મહાધ્યાનં પરાયણમ ।
મહાપાપહરં દેવં મકારાય નમો નમઃ ।। ૩।।
શિવં શાંતં જગન્નાથં લોકાનુગ્રહકારકમ ।
શિવમેકપદં નિત્યં શિકારાય નમો નમઃ ।। ૪।।
વાહનં વૃષભો યસ્ય વાસુકિઃ કંઠભૂષણમ ।
વામે શક્તિધરં વેદં વકારાય નમો નમઃ ।। ૫।।
યત્ર તત્ર સ્થિતો દેવઃ સર્વવ્યાપી મહેશ્વરઃ ।
યો ગુરુઃ સર્વદેવાનાં યકારાય નમો નમઃ ।। ૬।।
ષડક્ષરમિદં સ્તોત્રં યઃ પઠેચ્છિવસંનિધૌ ।
શિવલોકમવાપ્નોતિ શિવેન સહ મોદતે ।। ૭।।
।। ઇતિ શ્રી રુદ્રયામલે ઉમામહેશ્વરસંવાદે
ષડક્ષરસ્તોત્રં સંપૂર્ણમ ।।